पञ्चमः पाठः

# भारतमहिमा

(अस्माकं देशः भारतवर्षमिति कथ्यते। अस्य महिमा सर्वत्र गीयते। पाठेऽस्मिन् विष्णुपुराणात् भागवतपुराणात् च प्रथमं द्वितीयं च क्रमशः पद्यं गृहीतमस्ति। अवशिष्टानि पद्यान्यध्यक्षेण निर्मीय प्रस्तावितानि। भारतं प्रति भक्तिरस्माकं कर्तव्यरूपेण वर्तते।)

## पौराणिकी

गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥

अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकं स्पृहा हि नः॥

## आधुनिकी

इयं निर्मला वत्सला मातृभूमिः
प्रसिद्धं सदा भारतं वर्षमेतत्।
विभिन्ना जना धर्मजातिप्रभेदै-
रिहैकत्वभावं वहन्तो वसन्ति॥

विशालास्मदीया धरा भारतीया
सदा सेविता सागरै रम्यरूपा।
वनैः पर्वतैर्निर्झरैर्भव्यभूति-
र्वहन्तीभिरेषा शुभा चापगाभिः॥

जगद्गौरवं भारतं शोभनीयं
सदास्माभिरेतत्तथा पूजनीयम्।
भवेद् देशभक्तिः समेषां जनानां
परादर्शरूपा सदावर्जनीया॥

## अन्वयाः

1. देवाः गीतकानि गायन्ति– ते पुरुषाः धन्याः किल (सन्ति ये) स्वर्गापवर्गास्पदमार्गभूते भारतभूमिभागे सुरत्वात् भूयः भवन्ति।
2. (देवाः गायन्तः कथयन्ति) अहो ! अमीषाम् (एभिः) किं शोभनम् अकारि ? (यत्) नृषु यैः भारताजिरे मुकुन्दसेवौपयिकं जन्म लब्धम्। स्विदुत एषां स्वयं हरिः प्रसन्नः। हि नः (अपि) स्पृहा।
3. एतत् प्रसिद्धं भारतं वर्षम्, इयं सदा निर्मला वत्सला मातृभूमिः इह धर्मजातिप्रभेदैः विभिन्नाः जनाः एकत्वभावं वहन्तः वसन्ति।
4. अस्मदीया भारतीया धरा विशाला, रम्यरूपा, शुभा भव्यभूतिः (च) एषा सागरैः, पर्वतैः, निर्झरैः वहन्तीभिः आपगाभिः च सदा सेविता (अस्ति)।
5. तथा शोभनीयं जगद्गौरवम् (च) एतत् भारतम् अस्माभिः सदा पूजनीयम्। (अत्रत्यानाम्) समेषां जनानां सदा आवर्जनीया परादर्शरूपा देशभक्तिः भवेत्।

## पदच्छेदाः

| | | |
|---|---|---|
| धन्यास्तु | – | धन्याः + तु |
| किमकारि | – | किम् + अकारि |
| स्विदुत | – | स्वित् + उत |
| यैर्जन्म | – | यैः + जन्म |

ABSOL
ABSIEL SOLUTIONS
PATNA

| | | |
|---|---|---|
| भारताजिरे | - | भारत + अजिरे |
| मुकुन्दसेवौपयिकम् | - | मुकुन्दसेवा + औपयिकम् |
| धर्म-जाति-प्रभेदैरिहैकत्वभावम् | - | धर्म-जाति-प्रभेदैः + इह + एकत्वभावम् |
| विशालास्मदीया | - | विशाला + अस्मदीया |
| पर्वतैर्निर्झरैर्भव्यभूतिर्वहन्तीभिरेषा | - | पर्वतैः + निर्झरैः + भव्यभूतिः + वहन्तीभिः + एषा |
| चापगाभिः | - | च + आपगाभिः |
| जगद्गौरवम् | - | जगत् + गौरवम् |
| सदास्माभिरेतत्तथा | - | सदा + अस्माभिः + एतत् + तथा |
| परादर्शरूपा | - | परा + आदर्शरूपा |
| सदावर्जनीया | - | सदा + आवर्जनीया |
| स्वर्गापवर्गास्पदमार्गभूते | - | स्वर्ग + अपवर्ग + आस्पदमार्गभूते |

## पदार्थाः

| | | | | |
|---|---|---|---|---|
| अकारि | - | अक्रियत | - | किया गया (कृ + लुङ् लकार, प्र० पु० एकवचन कर्मवाच्य) |
| किल | - | नूनम् | - | निश्चयवाचक अव्यय |
| सुरत्वात् | - | देवत्वात् | - | देवत्व के रूप में |
| स्वर्गापवर्गास्पदमार्गभूते | - | स्वर्ग-मोक्ष-योग्यमार्गरूपे | - | स्वर्ग और मोक्ष प्रदान करने योग्य-साधनस्वरूप। |
| भारताजिरे | - | भारतप्रांगणे | - | भारतभूमि में |
| स्विदुत | - | आहोस्वित् | - | अथवा |
| मुकुन्दसेवौपयिकम् | - | विष्णुसेवायोग्यम् | - | श्रीहरि की सेवा के योग्य |
| स्पृहा | - | वाञ्छा | - | इच्छा |
| वत्सला | - | वात्सल्ययुक्ता | - | ममतामयी |
| धर्म-जाति-प्रभेदैः | - | धर्मगत-जातिगत भेदोपभेदैः | - | धर्म और जाति के भेदों से |
| एकत्वभावम् | - | एकात्मभावम् | - | एकता के भाव को |
| वहन्तः | - | धारयन्तः | - | धारण करते हुए |
| अस्मदीया | - | अस्माकम् | - | हमारी |
| भव्यभूतिः | - | दिव्यैश्वर्या | - | भव्य ऐश्वर्य वाली |

| | | |
|---|---|---|
| आपगाभिः | - नदीभिः | - नदियों के द्वारा |
| समेषाम् | - सर्वेषाम् | - सभी की |
| परा | - श्रेष्ठा | - श्रेष्ठ |
| आवर्जनीया | - आकर्षणीया | - आकर्षण योग्य |
| आदर्शरूपा | - उदाहरणरूपा | - आदर्शरूप |
| गीतकानि | - गीतानि | - गीत |

## व्याकरणम्

गीतकानि - गीतम् एव गीतकम् तानि गीतकानि स्वार्थे कञ् प्रत्ययः।

स्वर्गापवर्गास्पदमार्गभूते - स्वर्गस्य अपवर्गस्य च मार्गभूतः (साधनस्वरूपः) सप्तमी एकवचने

अकारि - कृ धातोः कर्मवाच्ये प्रथमपुरुषे एकवचने लुङ्लकारे त प्रत्यये कृते 'अकारि' इति सिद्धम्।

भारताजिरे - भारतस्य अजिरे - षष्ठी तत्पुरुषः

मुकुन्दसेवौपयिकम् - मुकुन्दस्य सेवा इति मुकुन्दसेवा, तस्याः औपयिकम् उपायभूतम् इति मुकुन्दसेवौपयिकम् - षष्ठी तत्पुरुषः

वहन्तः - वह् + शतृ प्रत्यये वहत् पुँल्लिङ्गे प्रथमा बहुवचने वहन्तः।

सेविता - सेव् + क्त + टाप्

भव्यभूतिः - भव्या भूतिः यस्याः सा भव्यभूतिः

अस्मदीया - अस्मद् + छ (ईय) + टाप्

वहन्तीभिः - वह् + शतृ इति वहत् + ङीप् - वहन्ती तृतीय बहुवचनम्

शोभनीयम् - शुभ् + अनीयर्

पूजनीयम् - पूज् + अनीयर्

आवर्जनीया - आङ् + वृज् + अनीयर् + टाप्

देशभक्तिः - देशाय + भक्तिः - चतुर्थी तत्पुरुषः।

## अभ्यासः

### ( मौखिकः )

1. **एकपदेन उत्तरं वदत –**

(क) के गीतकानि गायन्ति ?

(ख) एषां कः प्रसन्नः ?

(ग) इयं निर्मला मातृभूमिः कीदृशी अस्ति ?

(घ) अस्मदीया भारतीया धरा कीदृशी अस्ति ?

(ङ) अस्माभिः सदा किं पूजनीयम् ?

2. **स्वमातृभूमिविषये द्वे वाक्ये वदत।**

## अभ्यासः

### ( लिखितः )

ABDJEL SOLUTIONS ABSOL * PATNA *

1. **एकपदेन उत्तरं लिखत –**

(क) देवाः कानि गायन्ति ?

(ख) जनैः कीदृशं जन्म लब्धम् ?

(ग) विशाला धरा का ?

(घ) जगद् गौरवं किं वर्तते ?

(ङ) समेषां जनानां का भवेत् ?

2. **पूर्णवाक्येन उत्तरं लिखत –**

(क) अस्माकं भारतीया धरा कीदृशी अस्ति ?

(ख) भारतीया धरा कैः काभिः च सेविता ?

(ग) धर्म-जाति प्रभेदैः विभिन्नाः जनाः किं वहन्तः वसन्ति ?

(घ) के वारंवारं भारते जन्म गृह्णन्ति ?

(ङ) सर्वेषां जनानां देशभक्तिः कीदृशी भवेत् ?

(च) भारतभूमिः कीदृशी अस्ति ?

(छ) भारताजिरे जन्म लब्धुं स्पृहा केषाम् अस्ति ?

3. **मञ्जूषायां लिखितपदानां समुचितप्रयोगं कृत्वा-**

**उदाहरणम्– अनुसृत्य पञ्च वाक्यानि रचयत -**

रामेण, श्यामेन, लतया, सीतया, हिमांशुना, शिशुना, गीता, ग्रन्थः, कार्यम्, पत्रम्, रामायणम्, चित्रम्, लेखनीयम्, दर्शनीयम्, पठनीयम्, स्मरणीया, पठनीयः, करणीयम्।

**उदाहरणम् - रामेण पत्रं लेखनीयम्।**

(क) ..........................................................................................।

(ख) ..........................................................................................।

(ग) ..........................................................................................।

(घ) ..........................................................................................।

(ङ) ..........................................................................................।

4. **उदाहरणम् अनुसृत्य निम्नाङ्कितपदानां कृते विलोमपदानि लिखत-**

उदाहरणम् - ''धन्याः'' इतिपदस्य विलोमपदम् = अधन्याः

प्रश्नाः

(क) सुरः (ख) पूजनीयम्

(ग) भारतीया (घ) शोभनम्

(ङ) प्रसन्नः (च) प्रसिद्धम्

(छ) शुभा (ज) लब्धम्

(झ) गौरवम् (ञ) रम्यरूपा

5. **उदाहरणम् अनुसृत्य रेखाङ्कितानां स्थाने विलोमपदानां प्रयोगं कृत्वा वाक्यानि रचयत ।**

उदाहरणम् - ये <u>पुण्यं</u> कुर्वन्ति ते <u>धन्याः</u> भवन्ति।

उत्तरम् - ये पापं कुर्वन्ति ते अधन्याः भवन्ति।

(क) ये <u>सज्जनाः</u> सन्ति ते <u>शोभनं</u> कार्यं कुर्वन्ति।

(ख) <u>पुरा</u> गङ्गा <u>निर्मला</u> प्रवहति स्म।

(ग) वाटिका <u>सपुष्पवृक्षैः</u> <u>रम्या</u> प्रतिभाति।

(घ) <u>धर्मात्मा</u> अस्माभिः <u>पूजनीयः</u> ।

(ङ) <u>सद्व्यवहारेण</u> मनसि <u>शान्तिः</u> प्रवर्धते।

ARIEL SOLUTIONS ABSOL PATNA

## योग्यताविस्तारः

अनेन पाठेन अयं सन्देशः प्रदीयते यत् वयं भारतीयाः स्वदेशं प्रति मनसा, वाचा, कर्मणा धनेन जीवनेन च निष्ठावन्तः भवेम। देशभक्तिः अस्माकं रक्तस्य कणे-कणे प्रवाहिता भवेत्। भारतमहिमा किं वा राष्ट्रमहिमा वेदेषु अपि वर्णितः। संस्कृतशिक्षकाणां सहयोगेन तान् वेदमन्त्रान् संगृह्णीयात् ।

(1) राष्ट्राभिवर्धनसूक्तम् (प्राचीनं राष्ट्रगीतम्) ॐ आ ब्रह्मन् ! ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम्, दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठा सभेयो युवाऽस्य यजमानस्य वीरो जायताम्। निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः, पच्यन्ताम् योगक्षेमो नः कल्पताम् ।

**''मन्त्रार्थाः सिद्धयः सन्तु पूर्णाः सन्तु मनोरथाः ।**
**शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥''**

(2) भारतमहिमा आधुनिकसंस्कृतसाहित्येऽपि भूरिशः प्राप्यते। तत्र स्व० वासुदेव द्विवेदिनः ''मातृभूमे नमो मातृभूमे नमः'' डा० रमाकान्त शुक्लस्य ''भाति मे भारतम्'' डा० सतीशचन्द्र झा वर्यस्य ''राजतां मे मनसि नः प्रियं भारतम्'' डा० वैद्यनाथ मिश्रस्य ''अखण्डं राष्ट्रदेवं स्वं नमामो भारतं दिव्यम्'' अन्येषाञ्च कवीनाम् मर्मस्पर्शिगीतानि भारतमहिमानं प्रस्तुवन्ति। एतेषां गीतानां वाचनं गायनञ्च करणीये।

(3) भारतस्य महिमानम् आधृत्य लघुनाटकस्य मञ्चनम् आयोजनीयम्।

(4) 'महिमा' महिमन् शब्दस्य प्रथमा विभक्तेः एकवचनस्य रूपं वर्तते। संस्कृते महिमन् पुँल्लिंगे भवति। एतस्य रूपाणि निम्नलिखितानि सन्ति।

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | महिमा | महिमानौ | महिमानः |
| द्वितीया | महिमानम् | महिमानौ | महिम्नः |
| तृतीया | महिम्ना | महिमभ्याम् | महिमभिः |
| चतुर्थी | महिम्ने | महिमभ्याम् | महिमभ्यः |

| | | | |
|---|---|---|---|
| पञ्चमी | महिम्नः | महिमभ्याम् | महिमभ्यः |
| षष्ठी | महिम्नः | महिम्नोः | महिम्नाम् |
| सप्तमी | महिमनि, महिम्नि | महिम्नोः | महिमसु |
| सम्बोधन | हे महिमन् | हे महिमानौ | हे महिमानः |

एवमेव गरिमन् (गरिमा) लघिमन् (लघिमा) अणिमन् (अणिमा) प्रभृतिशब्दानां रूपाणि भवन्ति।

□